कोड नं.
Code No. **49**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

| नोट | NOTE |
|---|---|
| (I) कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं । | (I) Please check that this question paper contains **15** printed pages. |
| (II) प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें । | (II) Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate. |
| (III) कृपया जाँच कर लें कि इस प्रश्न-पत्र में **15** प्रश्न हैं । | (III) Please check that this question paper contains **15** questions. |
| (IV) कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें । | (IV) Please write down the Serial Number of the question in the answer-book before attempting it. |
| (V) इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे । | (V) 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period. |

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयोः : होरात्रयम्* | *पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 80*

*Time allowed : 3 hours* | *Maximum Marks : 80*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

*संकेताभावे सर्वेषां प्रश्नानामुत्तराणि, संस्कृतेनैव लेखनीयानि ।*

*जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

*Answer all questions in Sanskrit, unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में **चार** खण्ड हैं ।*

*There are **four** sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठित – अवबोधनम् (अपठित – अवबोधन) | 10 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनं संस्कृतसाहित्येतिहासपरिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य-इतिहास का परिचय) | 40 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 15 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)

### अपठित – अवबोधनम्

### अपठित – अवबोधन

### Unseen Reading Comprehension

*10 अङ्काः*

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत ।
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।
Read the following passage and answer the given questions in Sanskrit.

यदा सिकन्दरः भारतम् आगच्छत् तदा तस्य मेलनम् एकेन तपस्विना सह अभवत् । तपस्वी तं दृष्ट्वा अहसत् । सिकन्दरः क्रुद्धो भूत्वा तपस्विनम् अवदत् – भवान् इदानीं मृत्योः हस्ते अस्ति । मम नाम सिकन्दरः अस्ति । अहं सर्वं विश्वम् अजयम् । तपस्वी एतत् श्रुत्वा उच्चैः हसितुं प्रारभत अवदत् च – अहं तु भवन्तं साधारणमेव जनं गणयामि । क्षणं चिन्तयतु भवान् मरुस्थले पिपासया पीडितः अस्ति, परमत्र कुत्रापि जलं नास्ति । तत्र यदि कोऽपि भवते जलभरितम् एकं चषकं ददाति तदा भवादृशाय विश्वविजयिने तस्य मूल्यं किं भविष्यति ? सः उक्तवान् – अहं तस्मै राज्यस्य अर्धं दास्यामि । यदि स एतावता मूल्येन न ददाति तदा ? स पुनः उक्तवान् – अहं सम्पूर्णं राज्यं दास्यामि । तपस्वी अकथयत् – इदानीं चिन्तयतु भवान्, भवतः सम्पूर्णराज्यस्य मूल्यं केवलं जलस्य एकः चषकः अस्ति, तदपि भवान् गर्वेण मत्तः अस्ति । एतत् श्रुत्वा सिकन्दरस्य गर्वः गलितो जातः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *1×2=2*

(i) सिकन्दरः कुत्र आगच्छत् ?

(ii) सिकन्दरं दृष्ट्वा कः अहसत् ?

(iii) कुत्र जलं न भवेत् ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) *2×2=4*

(i) सिकन्दरः क्रुद्धो भूत्वा तपस्विनम् किम् अवदत् ?

(ii) सिकन्दरस्य सम्पूर्णराज्यस्य मूल्यं किम् अस्ति ?

(iii) सिकन्दरः किमर्थं गर्वितः अस्ति ?

(स) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए ।

Write a suitable title for this passage. *1×1=1*

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्)

यथानिर्देश उत्तर दीजिए । (केवल तीन प्रश्न)

Answer as directed. (Only three questions) *1×3=3*

(i) 'अहसत्' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत ।

(ii) 'प्रसन्नः' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iii) 'अहं सर्वं विश्वम् अजयम्' अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'साधारणम्' इति विशेषणपदस्य विशेष्यपदं किम् ?

## खण्डः ख (SECTION B)
## संस्कृतेन रचनात्मकलेखनम्
## संस्कृत में रचनात्मक लेखन
## Writing Skills in Sanskrit *15 अङ्काः*

2. अधोलिखित-पदेषु **कानिचित् पञ्चपदानि** आधृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।

निम्नलिखित शब्दों में से **किन्हीं पाँच** शब्दों को लेकर पाँच वाक्य संस्कृत में लिखिए ।

Write five sentences in Sanskrit taking **any five** words given below as base. *1×5=5*

अधुना, शिक्षकः, विद्यालयस्य, ब्राह्मणाय, वृक्षात्, आलस्यम्, भोजनाय, कलमेन, पिता ।

**3.** प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत । (दशवाक्यानि)
दिए गए तथ्यों की सहायता से निम्नलिखित विषय पर संस्कृत में अनुच्छेद लिखिए । (दस वाक्य)
Write a passage in Sanskrit with the help of given facts on the given topic. (Ten sentences) $\frac{1}{2}\times 10=5$

**विषय: – आचारः परमो धर्मः**

सदाचारस्य अभिप्रायः
नैतिकं कर्तव्यम्
जीवने आचाराः व्यवहाराः कीदृशाः स्युः,
सदाचारिणां समाजे प्रभावः,
उपसंहारः

**अथवा (OR)**

**विषय: – विद्याधनम्**

विद्या नाम किम्
विद्योपार्जनस्य उपायाः
बौद्धिक – चारित्रिक – लाभाः
सर्वधनेषु विद्याधनस्य श्रेष्ठता,
उपसंहारः ।

**4.** अधोलिखितवाक्येषु **केषाञ्चन पञ्च**वाक्यानां संस्कृतेन अनुवादं कुरुत ।
निम्नलिखित वाक्यों में से **किन्हीं पाँच** का संस्कृत में अनुवाद कीजिए ।
Translate **any five** sentences in Sanskrit of the following. *1×5=5*

(i) राम विद्यालय जाता है ।
(ii) हम सब बाग में खेलते हैं ।
(iii) लता और रमा एक गीत गाती हैं ।
(iv) यह मेरी पुस्तक है ।
(v) वे सब कल निबन्ध लिखेंगे ।
(vi) मैंने भी पाठ पढ़ लिया ।
(vii) वृक्ष से फल गिरता है ।

(i) Ram goes to school.
(ii) We all play in the garden.
(iii) Lata and Rama sing a song.
(iv) This is my book.
(v) They all will write an essay tomorrow.
(vi) I have also read the lesson.
(vii) Fruit falls from the tree.

## खण्डः ग (SECTION C)

### पठितांश – अवबोधनं संस्कृतसाहित्येतिहासपरिचयः च

### पठितांश – अवबोधन एवं संस्कृत साहित्य-इतिहास का परिचय

### Reading Comprehension and Introduction to History of Sanskrit Literature

*40 अङ्काः*

**5.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit. *5*

**गद्यांशः**

क्षणे-क्षणे हयस्य खुराश्चिक्कण-पाषाणखण्डेषु प्रस्खलन्ति । पदे-पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाध्नन्ति, परं दृढसङ्कल्पोऽयं सादी (अश्वारोही) न स्वकार्याद् विरमति । परितः स-हडहडाशब्दं दोधूयमानानां परस्सहस्र-वृक्षाणां, महान्धतमसेन ग्रस्यमानानामिव सत्त्वानां क्रन्दनस्य च भयानकेन स्वनेन कवलीकृतमिव गगनतलम् । परं "देहं वा पातयेयं कार्यं वा साधयेयम्" इति कृतप्रतिज्ञाऽसौ शिववीरचरो निजकार्यान्न विरमति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) *1×2=2*

(i) हयस्य के पाषाणखण्डेषु प्रस्खलन्ति ?

(ii) शिववीरचरं काः आध्नन्ति ?

(iii) सादी कस्मात् न विरमति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $1\frac{1}{2}\times2=3$

(i) शिववीरचरस्य का प्रतिज्ञा आसीत् ?

(ii) गगनतलं कीदृशम् आसीत् ?

(iii) कीदृशाः वृक्षशाखाः सम्मुखम् आघ्नन्ति ?

**6.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित पद्य को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following poetry and answer the given questions in Sanskrit. *5*

**पद्यम्**

मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं, निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)
एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in one word. (Only two questions) *1×2=2*

(i) सन्तः कान् पर्वतीकुर्वन्ति ?

(ii) सन्तः केन पूर्णाः भवन्ति ?

(iii) निजहृदि के विकसन्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)
पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)
Answer in a complete sentence. (Only two questions) $1\frac{1}{2} \times 2 = 3$

(i) सज्जनाः कीदृशाः भवन्ति ?

(ii) सज्जनाः नित्यं निजहृदि कान् विकसन्ति ?

(iii) सन्तः कथं त्रिभुवनं प्रीणयन्ति ?

**7.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित नाट्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following drama passage and answer the given questions in Sanskrit. *5*

**नाट्यांशः**

*बटवः* — पश्यतु कुमारस्तावदाश्चर्यम् ।

*लवः* — दृष्टमवगतं च । नूनमाश्वमेधिकोऽयमश्वः ।

*बटवः* — कथं ज्ञायते ?

*लवः* — ननु मूर्खाः । पठितमेव हि युष्माभिरपि तत्काण्डम् ।
किं न पश्यथ ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः ।
यदि च विप्रत्ययस्तत्पृच्छत ।

*बटवः* — भो भोः ! किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ?

*लवः* — (सस्पृहमात्मगतम्) 'अश्वमेध' इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महान् उत्कर्षनिकषः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)

एक शब्द में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in one word. (Only two questions) $1 \times 2 = 2$

(i) कुमारः किं पश्यतु ?

(ii) अश्वः कीदृशः अस्ति ?

(iii) तत्काण्डं कैः पठितम् अस्ति ?

(ब) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)

पूर्ण वाक्य में उत्तर दीजिए । (केवल दो प्रश्न)

Answer in a complete sentence. (Only two questions) $1\frac{1}{2} \times 2 = 3$

(i) प्रत्येकं रक्षितारः कीदृशाः सन्ति ?

(ii) बटवः सैनिकान् किं पृच्छन्ति ?

(iii) लवः 'अश्वमेध' इति विषये किं वदति ?

**8.** पदानां समुचितार्थैः सह मेलनं कृत्वा लिखत । (केषाञ्चित् चतुर्णाम्)

शब्दों का समुचित अर्थों से मिलान करके लिखिए । (कोई चार)

Match the words with their meanings and rewrite the same. (Any four) $\frac{1}{2} \times 4 = 2$

| | **शब्दाः** | | **अर्थाः** |
|---|---|---|---|
| (अ) | असारः | (i) | सूर्यः |
| (ब) | क्रूरः | (ii) | कमलम् |
| (स) | न्यूनम् | (iii) | सारल्यम् |
| (द) | भास्करः | (iv) | अल्पम् |
| (य) | आर्जवम् | (v) | कठोरः |
| (र) | नीरजम् | (vi) | सारहीनः |

**9.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । (केषाञ्चित् चतुर्णाम्)

निम्नलिखित वाक्यों में रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए । (कोई चार)

Frame questions on the basis of underlined words in the following sentences. (Any four) *1×4=4*

(i) राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि ।

(ii) अस्माभिः पर्वताः शंकवः कृताः ।

(iii) भगवद्वाक्यानि समाप्तानि न भवन्ति ।

(iv) बुद्धिमता राज्यं न प्रार्थनीयम् ।

(v) लवणः जम्बुद्वीपस्य आवरकः ।

(vi) तस्याः दार्शनिकैः सप्तधा विभागः कृतः ।

**10.** अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत । (कस्यचिदेकस्य)

निम्नलिखित भावार्थ में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्त स्थानों की पूर्ति कीजिए । (कोई एक)

Fill in the blanks in the following explanations with the help of the words as given in the box. (Any one) *3×1=3*

(अ) विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।

अविद्यां मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।

**भावार्थः**

यः जनः व्यवहारिकविद्यायाः आध्यात्मिकविद्यायाः च उभयोः (i) __________ सहैव सम्यग्तया अवगच्छति । स (ii) __________ संसारबन्धनात् मुक्तः भूत्वा विद्याभ्यासेन (iii) __________ प्राप्नोति ।

(ब) तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ।।

**भावार्थः**

प्रकृतेः परवशतया मनुष्यः कर्म (i) _________ । अत एव करणीयानि कर्माणि मनुष्यैः सदा (ii) _________ भावनया एव अनुष्ठेयानि । अनासक्तः भूत्वा कर्माणि कुर्वन् जनः परमं (iii) _________ प्राप्नोति ।

**मञ्जूषा**

| |
|---|
| करोति, अमृतत्वम्, विद्ययोः, अनासक्त्या, परमेश्वरम्, जनः |

**11.** अधोलिखित-अन्वये रिक्तस्थानानि पूरयत । (केवलम् एकम्)
निम्नलिखित श्लोकों के अन्वय में रिक्त स्थानों की पूर्ति कीजिए । (केवल एक)
Fill in the blanks in the following prose-order-renderings of the verse.
(Only one) *3×1=3*

समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूत् गुरुदक्षिणायै ।

स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात् ।।

**अन्वयः**

समाप्तविद्येन मया (i) _________ गुरुदक्षिणायै विज्ञापितो अभूत् । स मे (ii) _________ ताम् अस्खलितोपचारां (iii) _________ एव पुरस्तात् अगणयत् ।

**अथवा**

ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।
वर्णाश्रमाणां गुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ।।

**अन्वयः**

ततः सः (i) _________ वर्णी यथावत् विहिताध्वराय स्मयावेशविवर्जिताय (ii) _________ गुरवे प्रस्तुतम् (iii) _________ ।

**12.** यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. *5*

(अ) कर्तृपदं क्रियापदं च चिनुत । (केवलम् एकम्)

कर्ता एवं क्रियापद चुनिए । (केवल एक)

Select the subject and the verb. (Only one) *1*

(i) तं विनीततरमिच्छन् कर्तुं शुकनास उवाच ।

(ii) नाशयति च पुरुषम् अत्यासङ्गः विषयेषु ।

(ब) विशेषणं विशेष्यं च चिनुत । (केवलम् एकम्)

विशेषण और विशेष्य पद चुनिए । (केवल एक)

Select the adjective and special word. (Only one) *1*

(i) निसर्गत एव अतिगहनं तमो यौवनप्रभवम् ।

(ii) अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः ।

(स) वाक्ये प्रयुक्तं सर्वनामपदं कस्मै प्रयुक्तम् ? (केवलम् एकम्)

वाक्य में प्रयुक्त सर्वनाम पद किसके लिए प्रयोग किया गया है ? (केवल एक)

In the following sentence for whom is the pronoun used ? (Only one) *1*

(i) अतिजवेन दूरमतिक्रान्तः <u>स</u> चपलः कथं दृश्यते ।

(ii) विदितवेदितव्यस्याधीतसर्वशास्त्रस्य <u>ते</u> नाल्पमप्युपदेष्टव्यमस्ति ।

(द) अधोलिखितं वाक्यं कस्मात् ग्रन्थात् गृहीतं कश्च तस्य लेखकः ? (केवलम् एकम्)

निम्नलिखित वाक्य किस ग्रन्थ से लिया गया है और उसका लेखक कौन है ? (केवल एक)

From which book the following sentence is taken and who is its writer. (Only one) *1*

(i) स्वामिमहोदयस्य 'किन्तु' मम कण्ठनलिकामरुधत् ।

(ii) स स्वल्पभाषी, अतस्तस्य मनः कथा मनोव्यथा वा बोधगम्या नास्ति ।

(य) कः कं कथयति ? (केवलम् एकम्)

कौन किसको कह रहा है ? (केवल एक)

Who is saying this to whom ? (Only one) *1*

(i) अधुना मम गमनसमयः समुपागत एव । मम दायित्वहस्तान्तरणपत्रकं सज्जी कुरु ।

(ii) गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम् ।

**13.** (अ) अधोलिखितेषु कविषु **केषाञ्चन चतुर्णां** कवीनाम् एकैकस्य काव्यस्य नाम लिखत ।

निम्नलिखित कवियों में से **किन्हीं चार** कवियों के एक-एक काव्य का नाम लिखिए ।

Write the names of any one work of **any four** poets of the following poets. *1×4=4*

वेदव्यासः, बाणभट्टः, मथुरानाथ शास्त्री, अम्बिकादत्तव्यासः, पण्डितराज-जगन्नाथः

(ब) अधोलिखितासु रचनासु **कासाञ्चित् चतसृणां** लेखकानां नामानि लिखत ।

निम्नलिखित रचनाओं में से **किन्हीं चार** के लेखकों के नाम लिखिए ।

Write the names of the authors of **any four** of the following works. *1×4=4*

रघुवंशम्, नीतिशतकम्, प्रबन्ध-मञ्जरी, पाषाणी-कन्या, समुद्र-संगमः

## खण्डः घ (SECTION D)

## छन्दोऽलङ्काराः

## छन्द एवं अलङ्कार

## Metres and Figures of Speech

*15 अङ्काः*

**14.** (अ) प्रश्नान् उत्तरत । (केवलं द्वयम्)

प्रश्नों के उत्तर दीजिए । (केवल दो)

Answer the questions. (Only two) *1×2=2*

(i) मगणस्य रूपं लिखत ।

(ii) 'मनसि' इत्यत्र को गणः ?

(iii) 'भवन्ति' अत्र 'व' इति लघुः गुरुः वा ?

(ब) अधोलिखितपरिभाषाः पूरयत । (केवलं द्वयम्)

निम्नलिखित परिभाषाओं को पूर्ण कीजिए । (केवल दो)

Complete the following definitions. (Only two) *1×2=2*

(i) स्यादिन्द्रवज्रा यदि तौ _________ ।

(ii) सूर्याश्वैर्यदि _________ शार्दूलविक्रीडितम् ।

(iii) _________ रसनगैर्मो भनौ तौ गयुग्मम् ।

(स) **एकस्य** छन्दसः उदाहरणं लिखत ।

**किसी एक** छन्द का उदाहरण लिखिए ।

Write an example of **any one** of the metres. *1×1=1*

मालिनी, वंशस्थम्

(द) अधोलिखित-पङ्क्तिषु किं किं छन्दः ? (केवलं त्रयम्)

निम्नलिखित पंक्तियों में कौन-कौन सा छन्द है ? (केवल तीन)

What is the metre in the following lines ? (Only three) *1×3=3*

(i) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।।

(ii) पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम् ।

(iii) गिरौ कलापी गगने पयोदो ।

(iv) प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ।

**15.** (अ) **कस्यचिदेकस्य** शब्दालङ्कारस्य सोदाहरणं लक्षणं लिखत ।

**किसी एक** शब्दालंकार का सोदाहरण लक्षण लिखिए ।

Write the definition and example of **any one** of the figure of speech (शब्दालङ्कार). *2×1=2*

यमकम्, अनुप्रासः

(ब) **केवलमेकस्य** अर्थालङ्कारस्य लक्षणमुदाहरणं च लिखत ।

**केवल एक** अर्थालंकार का लक्षण एवं उदाहरण लिखिए ।

Define and illustrate **any one** of the figure of speech. (अर्थालङ्कार). *3×1=3*

उपमा, अर्थान्तरन्यासः

(स) अधोलिखितपङ्क्तिषु के अलङ्काराः ? (केवलं द्वयम्)

निम्नलिखित पंक्तियों में कौन-से अलंकार हैं ? (केवल दो)

Indicate the figure of speech in the following lines. (Only two) *1×2=2*

(i) अमङ्गलमिव उपघ्नन्ति विश्वासम् ।

(ii) मम जीवनप्रदीपो निर्वापितो भवितुमिच्छति ।

(iii) प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता ।